National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2015; 1(2): 80-83
© 2015 NJHSR
www.sanskritarticle.com

**प्रो.यशवीर सिंहः**
आचार्य .धर्मशास्त्र विभाग,
श्रीलालबहादूरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः,नव देहली -16

**Correspondence:**
**प्रो.यशवीर सिंहः**
आचार्य .धर्मशास्त्र विभाग,
श्रीलालबहादूरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः,नव देहली -16

# नीतिमयूख-विदुरनीत्योः राजगुणविवेचनम्

**प्रो. यशवीर सिंहः**

धर्मशास्त्रालोचितेषु विषयेषु बहवः विषयाः शास्त्रेषु आलोच्यन्ते। सर्वेऽपि ते विषयाः वस्तुतः षण्स्मार्तधर्मेषु अन्तर्भवन्ति। स्मार्तधर्मेषु सर्वेषां वै धर्माणां नेतृस्थानीयो भवति राजधर्मः। धर्मशास्त्रसाहित्यस्य चतुर्षु विभागेषु निबन्धसाहित्ये विराजन्ते ये केचन नीतिग्रन्थाः, तेषु प्रमुखो भवति श्रीनीलकण्ठभट्टविरचितः भगवन्तभास्कराख्याभूतः नीतिमयूखः। नीतिमयूखे यद्यपि राजधर्मविषयाः सन्निविष्टाः सन्ति, तथापि नीतिमयूखः आधुनिकयुगस्य कषायकलुषपीडितस्य मानवासमाजस्य कृते पथप्रदर्शक इव अग्रे विराजते। नीतिशास्त्राणाम् इतिहासः बृहदस्ति। नीतिशास्त्रेषु आचार्यशुक्रस्य शुक्रनीतिः, अमात्यचाणक्यस्य चाणक्यनीतिः, महात्मनः विदुरस्य विदुरनीतिश्च सुप्रतिष्ठिताः सन्ति। महाभारतस्य प्रमुखेन चरित्रेण महामनीषिणा विदुरेण प्रोक्ता नीतिः विदुरनीतिपदेन अभिधीयते। साऽपि नीतिः मानवस्य परमोत्कर्षनिमित्तं मानवजीवनं शृङ्खलितं कर्तुम् अभिप्रेता एव।

वस्तुतः नीतिमयूख-विदुरनीत्योः तुलनात्मकं विश्लेषणं यदा भवति तदा द्वयोर्मध्ये मतैक्यं दृश्यते। नीतिमयूखे राज्यस्य सप्ताङ्गानां वर्णनं दृश्यते। तच्च सप्ताङ्गम्— तानि च स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि चेति।

विदुरनीतौ अपि षडङ्गानां वर्णनम् अस्ति—

**एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशं कुरु।**
**पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भव॥**[1]

अत्र एकबुद्ध्या, द्वे अर्थात् कर्त्तव्याकर्त्तव्योः विनिश्चित्य, चतुर्भिः अर्थात् साम-दान-दण्ड-भेदैः, त्रीन् अर्थात् शत्रु-मित्र-उदासीनान्, वशीकुर्वन्तु। पञ्च अर्थात् इन्द्रियपञ्चकं वशीकृत्य, षट् अर्थात् षडङ्गानि-सन्धि-विग्रह-यान-आसन-द्वैधीभाव-समाश्रयान् ज्ञात्वा, सप्तानाम् इत्यर्थे परस्त्रीगमनम्, द्यूतम्, मृगयाम्, मद्यम्, परुषवचनम्, दण्डपारुष्यम्, अन्यायेन धनार्जनं च हित्वा सुखी भव। एतादृशी सम्मतिः विदुरेण कृतास्ति। अत्र **सत्यमेकं स्वर्गस्य सोपानम्** इति प्रोक्तम्।

नीतिशास्त्रस्य दृष्टार्थत्वान्न क्रमेऽभिनिवेशः कार्यः। तत्र स्वामी राजा। इन्द्रो वरुणश्च सम्राजौ। तयोर्विशेषा मानवरानन् सम्यक् स्पृशन्ति स्म आदर्शरूपेण।[2] इन्द्रस्य चातुर्दिग्विजयः परवर्तिमहारथानां दिग्विजयस्यादर्शं प्रस्तौति।[3] तत्र देवानामंशाः सन्तीत्याह मनुः।

राजा को भवेदिति प्रश्नः प्राचीनभारते विविधपरिस्थितिषु विविधप्रकारैः समाहितः। यजुर्वेदे ससारम् प्रोक्तो राजगुणः— **क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि।**[4] अर्थात् राज्यास्य सर्वविधाभ्युदयानां बीजम् राजनि विद्येत। आर्याणां प्रथमसम्राडिन्द्रो बभूव।[5] प्रजाभिः राजपदे चयनं तस्य प्राक्सिद्धप्रजापालनयोग्यतया सम्भावितम्, यतो हि नाम राजपदाधिषणास्तस्य पराक्रमान्

प्रजासंवर्धनक्षमान् परिपश्यन्तः स्वयमेव परस्परम् विमृश्येन्द्रम् राजपदमधिष्ठापयितुम् निवेदयामासुः।[6] शतपथब्राह्मणे राजा वरुण इव धर्मपतिरिरिति निगदितम्।[7]

कतिपयप्रेष्ठराजा मनीषिणां शुभकामनामहन्ति स्म। यथा राजा ध्रुवोऽचलः, सर्वविशां वाञ्छितः, राष्ट्रस्य शाश्वताधिष्ठाता, इन्द्र इव ध्रुवः, राष्ट्रधारकः, पृथिवीपर्वतध्रुवेवधारितराष्ट्रश्च भवेदिति।[8] ऐतरेय ब्राह्मणानुसारं राज्ञः जीवन-सर्वस्वमासीत् परमार्थेन प्रजाहित-साधनम्। एतदेव तस्य जीवनस्योद्देश्यम्। एतद्विना स आत्मानं तृणीभूतं मन्यते।

अर्थशास्त्रानुसारम्— भवति हि राजा संपूर्णस्यापि राजशासनस्य प्रधानपुरुषः। तमेवाश्रित्य कृत्स्नोऽपि राजव्यवहारः प्रवर्तते। किन्तु स स्वयमेव सर्वं साधयितुं न भवति समर्थः। शासनस्य महत्तरं दायित्वं वोढुं तस्य साहाय्ये केनापि अवश्यमेव भवितव्यम्। तदैव शासनस्य शासितानाञ्च कल्याणस्य समुचिता व्यवस्था सम्भवति निवृत्तश्च परिश्रमः राजा।

**विद्याविनीतो राजा हि प्रजानां विनये रतः।**
**अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः॥**[9]
**षड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः।**
**अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्॥**[10]

स्वयोग्यतया प्रांशउसत्त्वेन पराक्रमेण च स्वतः एव बहवः राजानः स्वराजवंशस्य प्रतिष्ठापका वभूवुः। नीतिमयूखे नीलकण्ठभट्टेन कामन्दकस्य मतम् उल्लिखितम्—

**यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजाः।**
**अकर्णधारा जलधौ विप्लवेतेह नौरिव॥**
**धार्मिकं पालनपरं सम्यक्परपुरञ्जयम्।**
**राज्ञानामभिमन्यन्ते प्रजापतिमिव प्रजाः॥**[11]

विदुरनीतौ अपि राज्ञः वर्णनं क्रियते—

**षडेव तु गुणाः पुंसा न हातव्याः कदाचन।**
**सत्यं दानमनालस्यमनसूया क्षमा धृतिः॥**[12]
**षण्णामात्मनि नित्यानामैश्वर्यैर्योऽधिगच्छति।**
**न स पापैः कुतोऽनर्थैर्युज्यते विजितेन्द्रियः॥**[13]
**यः काममन्यू प्रजहाति राजा पात्रे प्रतिष्ठापयते धनं च।**
**विशेषविच्छ्रुतवान् क्षिप्रकारी तं सर्वलोकः कुरुते प्रमाणम्॥**[14]

अयोग्यः कश्चित्जनः कूटवृत्त्या राजपदं प्राप्नोतु किन्तु स्वीयदुर्गुणात् सा अचिरेण परावर्तः।[15]

विदुरनीतौ अपि राज्ञः दुर्गुणानां वर्णनमस्ति— तत्र राज्ञः सप्तदोषाणाम् उल्लेखः वर्तते। अत्र पुरुषाणां षड्दोषाः वर्णिताः किन्तु राजा यदि असावधानः भवति चेत् सप्तविनष्टकारकाः दोषाः राज्ञः कृते कष्टकारकाः भवन्ति—

**सप्त दोषाः सदा राज्ञा हातव्या व्यसनोदयाः।**
**प्रायशो यैर्विनश्यन्ति कृतमुला अपीश्वराः॥**
**स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पञ्चमम्।**
**महच्च दण्डपारुष्यमर्थदूषणमेव च॥**[16]

नीतिमयूखेऽपि दोषाणां वर्णनं कृतमस्ति—

**मृगयाक्षास्तथा पानं गर्हितानि महीभृताम्।**
**दृष्टास्तेभ्यन्तु विशदः पाण्डुनैषधवृष्णिषु॥**
**कामः क्रोधस्तथा मोहो लोभो मानो मदस्तथा।**
**षड्वर्गमुत्सृजेदेनमस्मिन् त्यक्ते सुखी नृपः॥**[17]

नीतिमयूखानुरारेण राज्ञः दोषाः मृगया, द्यूतम्, मदिरापानम्, षडरिवर्गश्च तथा च विदुरनीतौ अपि स्त्रियासक्तिः, मृगया, द्यूतम्, मदिरापानम्, वाक्पारुष्यम्, दण्डपारुष्यम्, अर्थदूषणश्च एतेषां राज्ञः सप्तदोषाणाम् उल्लेखः कृतोऽस्ति। इतोऽपि अष्टलक्षणैः राज्ञः विनाशं भवति। विदुरेणोक्तम्—

**अष्टौ पूर्वनिमित्तानि नरस्य विनश्यतः।**
**ब्राह्मणान् प्रथमं द्वेष्टि ब्राह्मणैश्च विरुद्धयते॥**
**ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति।**
**रमते निन्दया चैषां प्रशंसां नाभिनन्दति॥**
**नैनान् स्मरति कृत्येषु याचितश्चाभ्यसूयति।**
**एतान् दोषान्नरो प्राज्ञो बुध्येद् बुद्ध्वा विसर्जयेत्॥**[18]

यः राजा जागरूकः न भवति सः अतिक्रान्तं भूत्वा स्वस्थैर्यं विनश्यति—

**यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये।**
**कोशे जनपदे दण्डे न स राज्येऽवतिष्ठते॥**[19]

साधारणतः क्षत्रिया राजानः बभूवुः किन्तु वैदिककालतः अक्षत्रियाः बहवः आर्येतराश्चापि राजानः प्रबभूवुरिति तत्रेतिहास एव प्रमाणम्।[20]

सर्वेषां वर्णानां राजानः काणेमहाभागेन संगृहीताः।[21]

नीतिमयूखानुरारेण राजा ध्रुवो भवेत्, यथा द्यौः पृथिवी, पर्वतो वा ध्रुवो भवति।[22]

**सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट्।**
**स महेन्द्रः स ईशः स कुबेरश्च प्रभावत इति॥**[23]

विदुरनीतौ राज्ञः गुणाः—

**अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च।**
**पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च॥**
**एतान् गुणँस्तात महानुभावानेकः गुणः संश्रयते प्रसह्य।**
**राजा यदा सत्कुरुते मनुष्यं सर्वाङ्गुणानेष गुणो विभाति॥**[24]

विदुरनीतौ युधिष्ठिरस्य गुणगणनं करोति महात्माविदुरः। वस्तुतः

युधिष्ठिरे धर्मसत्यपराक्रमादयः गुणाः सन्ति।[25] राजा ऋषयश्च पारस्परिकापेक्षाः समवर्तन्त। न केवलं यज्ञसम्पादनार्थं ब्रह्मविमर्शार्थमेव वापितु कर्तव्यपथविज्ञापनेनापि ऋषयो राजभिः सम्पृक्ता बभूवुः।[26] नीतिमयूखानुरारेण प्रायशो राजानः महावदान्या आसन्। कतिपये ब्रह्मविद्यायाः महापण्डिताः महाब्राह्मणानपि ब्रह्मविद्यां शिक्षयन्ति स्म।

**गुरुस्तु विद्याधिगमाय सेव्यते। श्रुता च विद्या मयते महात्मनाम्।**
**श्रुतानि पुण्यानि मतानि वेधसाऽसंशयं साधु भवन्ति भूतये॥**[27]

यः राजा अप्राप्यवस्तूंना प्राप्तिविषये न चिन्तयति, आपत्काले निर्भयः भवति[28], कार्यं आरभ्य मध्ये न विरमति[29], प्रगतिपथे अग्रेसरः भवति[30], कर्मयुक्तिज्ञाता, तत्त्ववेत्ता[31], प्रतिभासम्पन्नः, प्रवृत्तवाक्[32], शास्त्रज्ञः[33], धनं, विद्यां, ऐश्वर्यं च प्राप्य अभिमानरहितः विचरति[34], सैव विदुरनीत्यनुसारेण विद्वान् भवति।

ऋग्वेदादिषु राजापदस्य कतिपय पर्याया राज्ञो विशेषं प्रकटयन्ति। यथा नृपतिः प्रजापालक इति।[35] नृपतिः प्रायशोऽग्निनोपमीयते। अनेन नृपतौ आग्नेयगुणाः तेजस्वितादयो विभाव्यन्ते।[36] एवमेवेन्द्रगुण-सम्पन्नो भवति बला प्रदो राजा।[37] अश्विगुणसंजातमहिमा राजाधोविधं वर्णितः-

**इषां वोढा नृपतिर्वाजिनीवान्** ।[38]

राजभ्य उच्चतरः सम्राडुच्चकोटिको नरपतिर्बभूव। इन्द्रोऽपि तेनोपमितः यथा ऋग्वेदे-

यस्य क्रतुविदथ्यो न सम्राट् साह्नान् तरुत्रो अभ्यस्तिकृष्टीः।[39] प्र सम्राजं चर्षणीनाम्।[40]

**स वज्रभृद् दस्युहा भीम उग्रः सहस्रचेताः शतनीथऋभ्वा।**
**चम्रीषो न शवसा पा´चजन्यो मरुत्वान् नो भवत्विन्द्र ऊती।।**[41]

वैदिकयुगीने भारते नैकसम्राजः सैवापि व्यराजन्त। तेष्वेकः पृथुवंशीयोऽभ्यावर्तीति ख्यातः।[42] पुरुदेशीयः त्रसदस्युः, दशराजानां विजेतासीत्।

कौटिल्येन अर्थशास्त्रस्य मण्डलयोनि-नाम्ना प्रसिद्धे षष्ठेऽधिकरणे सप्तसंख्याका राजप्रकृतय उपवर्णिताः। परस्परं प्रकर्षेण शासनस्य शासिताना´च जनानामुपकारसाधकत्वेन उपवर्णिताः। परस्परं प्रकर्षेण शासनस्य शासिता-नाश्च जनानामुपकारसाधकत्वेन जनपदे विद्यमाना एताः खलु प्रकृतय उच्यन्ते। प्रकृतयश्च सन्ति “स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि”।[43]

एतासु आद्यः स्वामी वर्तते। स्वाामिपदेनाऽत्र राजा गृह्यते। तस्य स्वरुपं, व्यवहारः गुणाश्च कीदृशो भवन्ति इति आचार्येणोपवर्णितं विस्तरेण। तद्यथा -

स्वामिसम्पत्- महाकुलीनो दैवबुद्धिसत्त्वसंपन्नो वृद्धदर्शी धार्मिकः सत्यवागविसंवादकः कृतज्ञः स्थूललक्षो महोत्साहोऽदीर्घसूत्रः शक्यसामने दृढबुद्धिक्षुरद्रपरिषत्को विनयकाम इत्याभिगामिकाः गुणाः। शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोह तत्त्वाभिनिवेशाः प्रज्ञागुणाः। शौर्यममर्ष शीघ्रता दाक्ष्यं चोत्साहगुणाः।[44]

वृद्धसंयोगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनं, कार्यानुशासनेन स्वधर्मस्थापनं, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन हितेन राजा वृत्ति कुर्यात्।[45]

अन्यत्रापि कौटिल्यस्त्रिवधान् राजगुणान् विवृणोति[46] -

आभिगामिकगुणाः- महाकुलीनः, दैवबुद्धिः, सत्त्वसम्पन्नः, वृद्धदर्शी, धार्मिकः, सत्यवाक्, विसंवादकः, कृतज्ञः, स्थूललक्षः, उपायापायज्ञः, महोत्साहः, अदीर्घसूत्रः, शक्यसामन्तः, दृढबुद्धिः, अक्षुद्रः परिषत्कः, विनयकामश्च।

प्रज्ञागुणाः- शुश्रूषा- श्रवण- ग्रहण- धारणा- विज्ञानोहापोहतत्त्वाभिनिवेशाः।

उत्साहगुणाः- शौर्यम्, अमर्षः, शीघ्रता, दाक्ष्यं च।

राज्ञ आत्मसम्पदन्यैव। तद्यथा-वाग्मी, प्रगल्भः, स्मृतिमतिबल-वानुदग्रः, स्ववग्रहः, कृतशिल्पव्यसनः, दण्डनायी, उपकारापकार-योदृष्टप्रतीकारी, ह्रीमान्, आपत्प्रकृत्योर्विनियोक्ता, दीर्घदूरदर्शी, देशकालपुरुषकारकार्यप्रधानः, सन्धिविक्रमत्याग-संयमपणपरच्छिद्र-विभागी, संवृतः, अदीनाभि-हास्यजिह्मभ्रुकुटीक्षणः, कामक्रोधलोभ-स्तम्भ-चापलोपतापपैशुन्यहीनः, शकलः ;मधुरभाषीद्ध, स्मितोदग्रा-भिभाषी, वृद्धोपदेशाचारश्च।[47] विजयाय राज्ञः विशेषमहत्त्वगर्भित इति कौटिल्यदर्शन्।[48]

वस्तुतः नीतिमयूखे नीतिसारानुसारेण राज्ञः गुणानां वर्णनं नीलकण्ठभट्टेन कृतम्।[49] कानिचिन्निन्दनं अपि कृतम्।

**मृगयाक्षास्तया पानं गर्हितानि महीभुजाम्।**
**दृष्टास्तेभ्यन्तु विषदः पाण्डुनैषधवृष्णिषु।।**
**कामः क्रोधस्तथा मोहो लोभो मानो मदस्तथा।**
**षड्वर्गमुत्सृजेदेनमस्मिन् त्यक्ते सुखी नृपः।।**
**दंडक्यो नृपतिः कामात्क्रोधाच्च जनमेजयः।**
**लोभादैलस्तु राजाविर्वातापी मोहतोऽसुरः।।**
**पौलस्यो राक्षसो मानान्मदाद्दंभोवो नृपः।**
**प्रयाता निधनं ह्येते शत्रुषड्वर्गमाश्रिताः।।**
**शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः।।**
**अम्बरीषो महाभोगो बुभुजाते चिरं महीम्।।**
**वर्धयान्निह् धर्मार्थौ सेवितौ सणिरादरात्।**
**निगृहीतेन्द्रियग्रामः कुर्वीत गुरुसेवनम्।।**[50]

राजा वेदेषु आन्वीक्षिक्यां च प्रवीणो भवेदिति।[51] मनुः वार्तादण्डनीतिविषये तस्य प्रशिक्षणमावश्यकं मनुते।[52] महाभारते-ऽर्थशास्त्रे च राजकुमाराणां युद्धविद्याभ्यासस्यावश्यकता प्रतिपादिता।

खारवेलः पश्चदशर्षेतः चतुर्विंशतिवर्ष यावत् ज्ञानविज्ञानयोर्नेकशाखासु प्रावीण्यमवापेति तेन शिलालेख उट्टंकितम्।

चतुराश्रमिणां चतुर्वर्णानां च निष्टसमविकलं च विकासं साधयितुं राज्ञः पूर्वोक्तदिशा सुशिक्षावश्यकी मता। सुशिक्षितोऽयं राजा इन्द्रियजयी, निर्लोभश्च कामक्रोधाप्रसक्तो भवेत्।[53]

वाल्मीकिरामायणे युवराजपदेऽभिषेचनात् प्राग्रामस्य कल्याणगुणा अधोविधं संज्ञिताः -

दिव्यैर्गुणैः शक्रसमः, सत्यपराक्रमः, सत्यपरायणः, चन्द्रवत्प्रजासुखकरः, क्षमया वसुधासमः, बुद्ध्या बृहस्पतितुल्यः, वीर्येणेन्द्र एव, धर्मज्ञः, शीलवान्, अननसूयकः, कृतज्ञः, विजितेन्द्रियः, मृदुः, स्थिरचित्तः, प्रियवादी, बुद्धब्राह्मणानामुपासिता, महामतिः प्रजानां व्यसनेषु दुःखितः, स्मितपूर्वाभिभाषी, धर्माश्रितवक्ता वाचस्पतिर्यथा, न रागोपहतेन्द्रियः, लोकपालोपमः, सर्वशत्रुनिबर्हणः, सर्वस्यलोकस्य हिते निविष्टः।[54]

वस्तुतः राजधर्मः राज्ञा स्वीकृतो धर्मः राज्ञः कृते उद्दिष्टो धर्मश्च भवति। प्रसन्नेऽस्मिन् याज्ञवल्क्यस्मृतिभाष्यकारेण विज्ञानेश्वरेण यथार्थमेव प्रतिपादितं यत् 'शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापरिलानादि परमो धर्मः। तच्च दुष्टनिग्रहमन्तरेण न सम्भवति। दुष्टनिग्रहन्तु व्यवहारदर्शनमन्तरेण न सम्भवतीति।'[55] अर्थात् प्राजापरिपालनन्नभूतानां समेषां वै उपादानानां राजधर्मपदेन ग्रहणं समीचीनमेव विभाति।

**सन्दर्भ ग्रन्थः -**

1 विदुरनीति
2 नीतिमयूख
3 ऋग्वेद
4 यजुर्वेद २०.१
5 ऋग्वेद ४. १७. ५
6 ऐतरेय ब्राह्मण ८. ४. ३
7 शतपथ ५. ३. ३. ९
8 ऋग्वेद १०. १७३
9 अर्थशास्त्र
10 अर्थशास्त्र
11 नीतिमयूख, पृ. ४२
12 विदुरनीति
13 विदुरनीति
14 विदुरनीति
15 नीतिमयूख, पृ. ४२
16 विदुरनीति
17 नीतिमयूख, पृ. ४३
18 विदुरनीति
19 विदुरनीति
20 नीतिमयूख
21 धर्मशास्त्र का इतिहास द्धकाणेॠ
22 नीतिमयूख
23 नीतिमयूख
24 विदुरनीति
25 विदुरनीति
26 नीतिमयूख
27 नीतिमयूख
28 नाप्राप्यमभिवा´छन्ति नष्टं नेच्छन्ति शोचितुम्। आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः।। विदुरनीति,1.28
29 निश्चित्य यः प्रक्रामते नान्तर्वसति कर्मणः। अवन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते।। विदुरनीति,1.29
30 आर्यकर्मणि रज्यन्ते भूतिकर्माणि कुर्वते। हितिं च नाभ्यसूयन्ति पण्डिता भरतर्षभ।। विदुरनीति,1.30
31 तत्त्वज्ञः सर्वभूतानां योगशः सर्वकर्मणाम्। उपायज्ञो मनुष्याणां नरः पण्डित उच्यते।।विदुरनीति,1.32
32 प्रवृत्तवाक्चित्रकथ ऊहवान् प्रतिभानवान्। आशु ग्रन्थस्य वक्ता च यः स पण्डित उच्यते।। विदुरनीति,1.33
33 श्वतुं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा। असिम्भिन्नार्यमर्यादः पण्डिताख्यां लभेत सः।। विदुरनीति,1.34
34 अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा। विचरत्यसमुन्नाद्धो यः स पण्डित उच्यते।। विदुरनीति, 1.45
35 पा रक्षणे। पातेर्डति अतएव नृपतिः प्रजारक्षकः।
36 त्वामग्ने दम आ विश्पर्ति विशस्त्वां राजानं सुविदत्रमृन्जते। त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्त्राणि दशा दश प्रति।।ऋ. 2.1.8
37 ऋग्वेदे 4.20.1। अहमिन्द्रो वरुणः।ऋ. 4.42.3, इन्द्रः कृष्टीनां राजा।ऋ. 1.177.1, 8.13.9, इन्द्रः नरां नृपाता।ऋ. 1.174.10
38 ऋग्वेद, 7.69.1
39 ऋग्वेद, 4.21.2
40 ऋग्वेद, 8.16.1
41 ऋग्वेद 1.100.12
42 ऋग्वेद 6.27.8
43 अर्थशास्त्रम् , 6.96.1
44 अर्थशास्त्रम् , 6.96.1
45 अथ्र्याास्त्र-1.7.2
46 अथ्र्याास्त्र-6.1.3-5
47 अथ्र्याास्त्र-6.1.6
48 प्रभाववन्त उत्साहवतो जित्वा पृथ्वीं जिग्युः। अथ्र्याास्त्र-9.1.9
49 नीतिमयूख पृ. 43
50 नीतिमयूख पृ. 44
51 गौतमधर्मसूत्र 11.3
52 मनुस्मृति-7.43
53 मृगयाक्षी दिवास्वापः परिवादः स्त्रियो मदः। तौर्यत्रिकं वथाटचा च कामजो दशको गणः।। मनुस्मृति-7.47
पैशुन्यं साहसं द्रोह ईर्घ्यासूयार्थदूषणम्। वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः।। मनुस्मृति-7.48
54 अयोध्याकाण्डस्य द्वितीयसर्ग
55 म.स्मृ. 2/20